श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ षड्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षड्विंशः सर्गः ॥

## सारणेन रावणं प्रति पृथक् पृथग् वानरयूथपतीनां परिचयदानम्

तद्वचः सत्यमक्लीबं सारणेनाभिभाषितम्।
निशम्य रावणो राजा प्रत्यभाषत सारणम्॥ **6.26.1** ॥

यदि मामभियुञ्जीरन् देवगन्धर्वदानवाः।
नैव सीतामहं दद्यां सर्वलोकभयादपि॥ **6.26.2** ॥

त्वं तु सौम्य परित्रस्तो हरिभिः पीडितो भृशम्।
प्रतिप्रदानमद्यैव सीतायाः साधु मन्यसे॥ **6.26.3** ॥

को हि नाम सपत्नो मां समरे जेतुमर्हति।
इत्युक्त्वा परुषं वाक्यं रावणो राक्षसाधिपः॥ **6.26.4** ॥

आरुरोह ततः श्रीमान् प्रासादं हिमपाण्डुरम्।
बहुतालसमुत्सेधं रावणोऽथ दिदृक्षया॥ **6.26.5** ॥

ताभ्यां चराभ्यां सहितो रावणः क्रोधमूर्च्छितः।
पश्यमानः समुद्रं तं पर्वतांश्च वनानि च॥ **6.26.6** ॥

ददर्श पृथिवीदेशं सुसम्पूर्णं प्लवङ्गमैः।
तदपारमसह्यं च वानराणां महाबलम्॥ **6.26.7** ॥

आलोक्य रावणो राजा परिपप्रच्छ सारणम्।
एषां के वानरा मुख्याः के शूराः के महाबलाः॥ **6.26.8** ॥

के पूर्वमभिवर्तन्ते महोत्साहाः समन्ततः।
केषां शृणोति सुग्रीवः के वा यूथपयूथपाः॥ **6.26.9** ॥

सारणाचक्ष्व मे सर्वं किं प्रभावाः प्लवङ्गमाः।
सारणो राक्षसेन्द्रस्य वचनं परिपृच्छतः॥ **6.26.10** ॥

आबभाषेऽथ मुख्यज्ञो मुख्यांस्तत्र वनौकसः।
एष योऽभिमुखो लङ्कां नर्दंस्तिष्ठति वानरः॥ **6.26.11** ॥

यूथपानां सहस्राणां शतेन परिवारितः।
यस्य घोषेण महता सप्राकारा सतोरणा॥ **6.26.12** ॥

लङ्का प्रतिहता सर्वा सशैलवनकानना।
सर्वशाखामृगेन्द्रस्य सुग्रीवस्य महात्मनः॥ **6.26.13** ॥

बलाग्रे तिष्ठते वीरो नीलो नामैष यूथपः।
बाहू प्रगृह्य यः पद्भ्यां महीं गच्छति वीर्यवान्॥ **6.26.14** ॥

लङ्कामभिमुखः कोपादभीक्ष्णं च विजृम्भते।
गिरिशृङ्गप्रतीकाशः पद्मकिञ्जल्कसन्निभः॥ **6.26.15** ॥

स्फोटयत्यतिसंरब्धो लाङ्गूलं च पुनः पुनः।
यस्य लाङ्गूलशब्देन स्वनन्ति प्रदिशो दश॥ **6.26.16** ॥

एष वानरराजेन सुग्रीवेणाभिषेचितः।
युवराजोऽङ्गदो नाम त्वामाह्वयति संयुगे॥ **6.26.17** ॥

वालिनः सदृशः पुत्रः सुग्रीवस्य सदा प्रियः।
राघवार्थे पराक्रान्तः शक्रार्थे वरुणो यथा॥ **6.26.18** ॥

एतस्य सा मतिः सर्वा यद् दृष्टा जनकात्मजा।
हनूमता वेगवता राघवस्य हितैषिणा ॥ **6.26.19** ॥

बहूनि वानरेन्द्राणामेष यूथानि वीर्यवान्।
परिगृह्याभियाति त्वां स्वेनानीकेन मर्दितुम् ॥ **6.26.20** ॥

अनुवालिसुतस्यापि बलेन महता वृतः।
वीरस्तिष्ठति सङ्ग्रामे सेतुहेतुरयं नलः ॥ **6.26.21** ॥

ये तु विष्टभ्य गात्राणि क्ष्वेडयन्ति नदन्ति च।
उत्थाय च विजृम्भन्ते क्रोधेन हरिपुङ्गवाः ॥ **6.26.22** ॥

एते दुष्प्रसहा घोराश्चण्डाश्चण्डपराक्रमाः।
अष्टौ शतसहस्राणि दशकोटिशतानि च।
य एनमनुगच्छन्ति वीराश्चन्दनवासिनः ॥ **6.26.23** ॥

एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम्।
श्वेतो रजतसङ्काशश्चपलो भीमविक्रमः ॥ **6.26.24** ॥

बुद्धिमान् वानरः शूरस्त्रिषु लोकेषु विश्रुतः।
तूर्णं सुग्रीवमागम्य पुनर्गच्छति वानरः ॥ **6.26.25** ॥

विभजन् वानरीं सेनामनीकानि प्रहर्षयन्।
यः पुरा गोमतीतीरे रम्यं पर्येति पर्वतम् ॥ **6.26.26** ॥

नाम्ना संरोचनो नाम नानानगयुतो गिरिः।
तत्र राज्यं प्रशास्त्येष कुमुदो नाम यूथपः ॥ **6.26.27** ॥

योऽसौ शतसहस्राणि सहर्षं परिकर्षति।
यस्य वाला बहुव्यामा दीर्घलाङ्गूलमाश्रिताः ॥ **6.26.28** ॥

ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरदर्शनाः।
अदीनो वानरश्चण्डः सङ्ग्रामममभिकाङ्क्षति।
एषोऽप्याशंसते लङ्कां स्वेनानीकेन मर्दितुम्॥ **6.26.29**॥

यस्त्वेष सिंहसङ्काशः कपिलो दीर्घकेसरः।
निभृतः प्रेक्षते लङ्कां दिधक्षन्निव चक्षुषा॥ **6.26.30**॥

विन्ध्यं कृष्णगिरिं सह्यं पर्वतं च सुदर्शनम्।
राजन् सततमध्यास्ते स रम्भो नाम यूथपः।
शतं शतसहस्राणां त्रिंशच्च हरिपुङ्गवाः॥ **6.26.31**॥

यं यान्तं वानरा घोराश्चण्डाश्चण्डपराक्रमाः।
परिवार्यानुगच्छन्ति लङ्कां मर्दितुमोजसा॥ **6.26.32**॥

यस्तु कर्णौ विवृणुते जृम्भते च पुनः पुनः।
न तु संविजते मृत्योर्न च सेनां प्रधावति॥ **6.26.33**॥

प्रकम्पते च रोषेण तिर्यक् च पुनरीक्षते।
पश्य लाङ्गूलविक्षेपं क्ष्वेडत्येष महाबलः॥ **6.26.34**॥

महाजवो वीतभयो रम्यं साल्वेयपर्वतम्।
राजन् सततमध्यास्ते शरभो नाम यूथपः॥ **6.26.35**॥

एतस्य बलिनः सर्वे विहारा नाम यूथपाः।
राजञ्छतसहस्राणि चत्वारिंशत्तथैव च॥ **6.26.36**॥

यस्तु मेघ इवाकाशं महानावृत्य तिष्ठति।
मध्ये वानरवीराणां सुराणामिव वासवः॥ **6.26.37**॥

भेरीणामिव सन्नादो यस्यैष श्रूयते महान्।
घोषः शाखामृगेन्द्राणां सङ्ग्रामममभिकाङ्क्षताम्॥ **6.26.38**॥

एष पर्वतमध्यास्ते पारियात्रमनुत्तमम्।
युद्धे दुष्प्रसहो नित्यं पनसो नाम यूथपः॥ **6.26.39** ॥

एनं शतसहस्राणां शतार्धं पर्युपासते।
यूथपा यूथपश्रेष्ठं येषां यूथानि भागशः॥ **6.26.40** ॥

यस्तु भीमा प्रवल्गन्तीं चमूं तिष्ठति शोभयन्।
स्थितां तीरे समुद्रस्य द्वितीय इव सागरः॥ **6.26.41** ॥

एष दर्दुरसङ्काशो विनतो नाम यूथपः।
पिबंश्चरति यो वेणां नदीनामुत्तमां नदीम्॥ **6.26.42** ॥

षष्टिः शतसहस्राणि बलमस्य प्लवङ्गमाः।
त्वामाह्वयति युद्धाय क्रोधनो नाम वानरः॥ **6.26.43** ॥

विक्रान्ता बलवन्तश्च यथा यूथानि भागशः।
यस्तु गैरिकवर्णाभं वपुः पुष्यति वानरः॥ **6.26.44** ॥

अवमत्य सदा सर्वान् वानरान् बलदर्पितः।
गवयो नाम तेजस्वी त्वां क्रोधादभिवर्तते॥ **6.26.45** ॥

एनं शतसहस्राणि सप्ततिः पर्युपासते।
एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम्॥ **6.26.46** ॥

एते दुष्प्रसहा वीरा येषां सङ्ख्या न विद्यते।
यूथपा यूथपश्रेष्ठास्तेषां यूथानि भागशः॥ **6.26.47** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षड्विंशः सर्गः॥